**त्रिसम** न० त्रयः समा यत्र। समहरीतकीनागरगुड़रूपे पदार्थे राजनि०। समा० द्वि०। २वर्षत्रये न०।

**त्रिसर** पु० कृसर+पृषो०। कृशरे हेमच०।

**त्रिसरक** न० त्रिवारं सरकम्, त्रयाणां सरकाणां शीधुपानानां समाहारः पात्रा०न ङीप् वा। त्रिवारे मधुपाने "प्रातिभं त्रिसरकेण गतानाम्" माघः।

**त्रिसर्ग** पु० त्रयाणां सत्त्वरजस्तमसां सर्गः। सत्त्वरजस्तमसां सर्गे। "यत्र त्रिसर्गो मृषा" भा० १।१।१।

**त्रिसामन्** पु० त्रीणि सामानि स्तुतिसाधनानि यस्य। १परमेश्वरे। "त्रिसामा सामगः साम त्रिवर्णो भेषजं भिषक्" विष्णु सं०। "त्रीणि वेदव्रतसामाख्यानि तैस्त्रिसामभिः स्तुतस्त्रिसामा" भा० वेदव्रतसामानि च। "अधिपताद् मित्र! पताद् सुरपताद्" इत्येवमादीनि त्रीणि सामानि।२महेन्द्राद्रेः चरन्त्यां नद्याम् स्त्री टाप् शब्दार्थचि०। "ऋषिकुल्या त्रिसामा कौशिकी इत्यादि" भाग० ५।१९।१८। भारतवर्षमहानद्युक्तौ।

**त्रिसाहस्र** त्रि० त्रीणि सहस्राणि परिमाणमस्य अण् उत्तरपदवृद्धिः। त्रिभिः सहस्रैः १परिमिते। स्त्रियां ङीप्। "त्रिसाहस्रयुत्तमा" कात्या० श्रौ० १७।७२३। "उत्तमा चितिः त्रिसाहस्री लोकम्पृणानां भवति" कर्कः।

**त्रिसिता** स्त्री त्रिगुणिता सिता शा० त०। त्रिशर्कराशब्दार्थे राजनि०। [सीतया कृष्टक्षेत्रे अमरः।

**त्रिसीत्य** न० त्रिवारं सीतया समितम् यत्। त्रिःकृत्वः

**त्रिसुगन्धि** न० त्रयाणां सुगन्धिद्रव्याणां समाहारः। "त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्" इत्युक्ते तुल्यभागे एलादित्रिके राजनि०। "पिबेद्रसं पुष्पफलोद्भवं वा सितामधूकत्रिसुगन्धियुक्तम्" सुश्रुतः।

**त्रिसुवर्चक** पु० आङ्गिरसे च्यवनरूपे वह्नौ "अग्निराङ्गिरसश्चैव च्यवनस्त्रिसुवर्चकः" भा० व० २१९ अ०।

**त्रिसौपर्ण** न० त्रिः सुपर्णेन ऋषिणा कृतमण् वृत्तौ त्रिशब्दस्य सुजर्थता उत्तरपदवृद्धिः। सुपर्णर्षिणा चरिते व्रतभेदे।

"सुपर्णो नाम तमृषिः प्राप्तवान् पुरुषोत्तमात्। तपसा वै सुतप्तेन दमेन नियमेन च। त्रिः परिक्रान्तवानेतत् सुपर्णो धर्ममुत्तमम्। यस्मात्तस्माद्व्रतं ह्येतत् त्रिसौपर्णमिहोच्यते। ऋग्वेदपाठपठितं व्रतमेतद्धि दुश्चरम्। सुपर्णाच्चाप्यधिगतो धर्म एष सनातनः। वायुना द्विपदां श्रेष्ठः कथितो जगदायुषा। वायोः सकाशात् प्राप्तश्च ऋषिभिर्विघसाशिभिः। ततो महोदधिश्चैव प्राप्तवान् धर्ममुत्तमम्। अन्तर्दधे ततो भूयो नारायणसमाहितः" भा० शा० ३५० अ०। सुपर्णा एव स्वार्थे अण् त्रयः सौपर्णा यत्र। ऋग्वेदे १०। ११४। ३। ४। ५। मन्त्रत्रिके। ते च मन्त्राः "चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते। तस्यां सुपर्णा वृषणा निषेदतुर्यत्र देवा दधिरे भागधेयम्"। ३ "एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे। तं पाकेन मनसा पश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम्"।४ "सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति। छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्य मिमते द्वादश"।५ सुपर्णपदघटिते मन्त्रे विदितं अण् उत्तरपदवृद्धिः।२परमेश्वरनामभेदे "त्रिसौपर्णं तथा ब्रह्म यजुषां शतरुद्रियम्" भा०शा०२८६अ०। "त्रिसौपर्णे विदितं नाम त्रिसौपर्णमिति तदर्थः" श्रीधरः। त्रिसौवर्णेति पाठः लिपिकरप्रमादात्।

**त्रिस्कन्ध** न० त्रयः स्कन्धा इवावयवा अस्य। ज्योतिःशास्त्रे बृ० स० १ अ० तस्य स्कन्धत्रयमुक्तं यथा

"ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् तत्कार्त्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता। स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः"। तेन तन्त्रहोराङ्गनिर्णयाख्यास्तस्य त्रयः स्कन्धाः।

**त्रिस्तन** न० त्रयःस्तना दोह्यायत्र। त्र्यहसाध्ये यज्ञे प्रथमायामुपसदि दोह्यत्रिस्तनरूपे १व्रतभेदे "त्रिस्तनं प्रथमायां दोहयति" कात्या० श्रौ० ८।२।१ त्रयःस्तना अस्या ङीष्। स्तनत्रययुक्ते २राक्षसीभेदे स्त्री "त्रिस्तनीमेकपादाञ्च त्रिजटामेकलोचनाम्" भा० व० २७९ अ०।

**त्रिस्त्रावा** स्त्री त्रिगुणिता तावती वेदिः। "द्विस्त्रावा त्रिस्त्रावा वेदिः" पा० अच् समा० टिलोपः समासश्च निपात्यते। प्रकृतौ यावती वेदिः ततस्त्रिगुणेऽश्वमेधाद्यङ्गे वेदिभेदे। वेदिभिन्ने तु त्रिस्तावती रज्जुः" इत्येव सि० कौ०।

**त्रिस्थली** स्त्री त्रयाणां गयाकाशीप्रयागरूपस्थलानां समाहारद्वि०। काशीगयाप्रयागरूपस्थलत्रिके। तदधिकृत्यैव त्रिस्थलीसेतुनामा ग्रन्थः अनन्तभट्टेन कृतः।

**त्रिस्थान** त्रि० त्रीणि स्थानान्यस्य। १स्वर्गमर्त्यपातालस्थे परमेश्वरे २जाग्रदाद्यवस्थात्रयसाक्षिणि जीवे च।